नं० १०४०-घ

वज्रपञ्जरं दत्तात्रेयस्तोत्रम् (सम्पूर्णम्)

नं० १०४०-घ

श्रीगणेशायनमः ॐ मूलाधारे वारिजपत्रे चतुरस्रं वं शं षं सं वर्णं चित्रालं सु
चित्रालं रक्तवर्णं श्रीगणनाथं भगवंतं दत्तात्रेयं श्रीगुरुमूर्तिं प्रणतोस्मि ॥१॥
स्वाधिष्ठाने षट्दलपत्रे तनुलिंगे बालांते तद्वर्णे शालं सुचित्रालं [illegible]वर्णं वाक्
पतिरमणं द्रुहिणं तं दत्तं ० २ नाभौ पद्मं पत्रं दशांकं डफवर्णं लक्ष्मीकांतं गरुडा
रूढं नरवीरं नीलंवर्णं निर्गुणरूपं निगमांतं दत्तं ० ३ हृत्पद्मांते द्वादशापत्रे कःव
र्णैश्चाबंरैा बंपूर्णमयंतं शक्तिवर्णं स्वर्गस्थित्यं कुरुविंदूतं शिवशक्तिं दत्तं ० ४॥
कंठस्थाने चक्रं विशुद्धं कमलांते चंद्राकारे षोडशापत्रे स्वर्णवर्णं मायाधीशं तेजसरू
पं भगवंतं दत्तं ० ५ अग्निश्चक्रे भ्रुकुटिस्थाने द्विदलांतं हं सं बीजं ध्यानसमुद्रं गुरुमूर्तिः
विद्युतवर्णं ज्ञानमयं तं चिद्रूपाक्षं दत्तं ० ६ मूर्ध्निस्थाने वारिजपत्रे शशिबीजं शुभ्रं
वर्णं पत्रसहस्रं सुचित्रालं हंबीजास्यं वर्णसहस्रं तुरियं तं दत्तं ० ७ ब्रह्मानंदं ब्रह्म
मुकुंदं भगवंतं ब्रह्मज्ञानं ब्रह्ममयं तं स्वयमेवं ब्रह्मात्मानं ब्रह्ममुनींद्रं भसितांभं दत्तं ०
८ शांताकारं शेषशयानं सुरवंद्यं कांतानाथं कोमलगात्रं कमलाक्षं चिंतारत्नं चि
द्घनपूर्णं द्विजराज्यं दत्तं ० ९ चित्त ओंकारं ध्वनिनादे च स्वच्छंदे आकारांते क्षरव
र्णांते [illegible] गुणरूपे वेदांतार्थं ज्ञानस्वरूपं निजबोधं दत्तात्रेयं श्रीगुरुमूर्तिं प्रण
तोस्मि १० इति श्री अजपातंत्रे दत्तात्रेयस्तोत्रं संपूर्णं शुभं भवतु श्रीरस्तु ॥